National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(61): 230-232
© 2025 NJHSR
www.sanskritarticle.com

**अष्टमी बेज्**
शोधार्थी, साहित्यविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**अष्टमी बेज्**
शोधार्थी, साहित्यविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# आधुनिकसंस्कृतसाहित्ये आचार्यनित्यानन्दस्मृतितीर्थानाम् अवदानम्

**अष्टमी बेज्**

## प्रस्तावना

संस्कृतभाषा विश्वस्य प्राचीनतमा भाषा भारतस्य अमूल्यनिधिश्च भवति। संस्कृतं भारतीयसंस्कृतेः आत्मा एव भवति। संस्कृतभाषया माध्यमेन भारतीयसंस्कृतिः सुप्रतिष्ठिता अस्ति।

उक्तं च- संस्कृतं संस्कृतेर्मूलं ज्ञान – विज्ञानवारिधिः ।

वेदं तत्त्वार्थसजुष्टं लोकालोककरं शिवम्।।

संस्कृतं भारपीयभाषापरिवारस्य प्रधाना भाषा भवति। संस्कृतम् आर्यभाषाणां जननी, द्राविडभाषाणां पोषिणी च वर्तते। भारतीयसंस्कृतेषु विविधविषयेषु अन्यतमः गुरुत्वपूर्णः विषयम् अस्ति भाषा तदपि संस्कृतभाषा। भारतस्य एकता, अखण्डता च संस्कृते निहिता वर्तते । अस्माकं सभ्यतासंस्कृतिश्च संस्कृतग्रन्थेषु विद्यमानमस्ति। संस्कृतभाषासंबलितसाहित्याकाशे प्राचीनतमं ऐतिहासिकं वर्णनं च उपलभ्यते। पुराणेषु उपनिषत्सु रामायणे महाभारते महाकाव्येषु वौद्धानां त्रिपिटकसाहित्ये अपि च जैनानामार्षसाहित्ये भारतस्य प्राचीनेतिहासः विद्यते। अस्माकं समस्तमपि प्राचीनं साहित्यं संस्कृतभाषामध्ये उपलभ्यते ।

अनेन संस्कृतभाषायाम् एव व्यासवाल्मीकीत्यादयोः महाकवयः महाभारतरामायणादीन् महाकाव्यान् विरचितवन्तः। तदुत्तरकालिनः कालिदासाश्वघोषभासादयः कवयः नाट्यकाराः च संस्कृतभाषया एव काव्यं रचयित्वा सम्मानिताः अभवन्। सुप्राचीनकालतः संस्कृतसाहित्यरचनायाः प्रवाहः निरन्तरं प्रवहमानः विलसन्ति । संस्कृतम् इति सम् – कृ +क्त इति व्युत्पादितम् । भाषारूपार्थे अस्य शव्दस्य प्रयोगः प्रथमतो वाल्मीकिरामायणे एव प्राप्यते –

**यदि वाचां प्रदास्यामि द्विजातिरिव संस्कृतम् ।**
**रावणं मन्यमाना सा सीता भीता भविष्यति ।।** सुन्दरकाण्डम् 30-18

भारतीयसंस्कृतेः स्रोतः संस्कृतभाषा भवति । अस्माकं सभ्यता संस्कृतिश्च वेदेभ्यः स्मृतिभ्यः पुराणेभ्यश्च निःसृता भवति। संस्कृतभाषामाध्यमेन भारतीयसभ्यतासंस्कृतिश्च विद्यमानम् अस्ति। अस्मिन् संसारे षोडशसंस्कारेषु नामकरणम् उपनयनं पाणिग्रहणमित्यादिसंस्काराः संस्कृतभाषायामेव भवति। देवपूजा हवनम् इत्यादयस्सर्वे संस्कृतभाषामाध्यमेनैव भवति।

साहित्यं समाजस्य दर्पणं भवति। समाजे यत् किमपि कार्यं क्रियते तत् साहित्येन एव प्रतिविम्वितं जायते। तस्मादेव कारणात् साहित्यिकाः समाजे वरेण्याः। साहित्यं विहाय संसारस्य संसारं विहाय साहित्यस्य स्थितिः नास्त्येव । प्रपञ्चेऽस्मिन् संस्कृतसाहित्सस्य यावान् विकासः परिलक्ष्यते न तथा इतरसाहित्यानाम्। संस्कृतसाहित्यम् अतीव विस्तृतं भवति । वैदिकसंस्कृते काव्यरचनैव प्रधानम् आसीत्। किन्तु लौकिकसंस्कृते गद्यं, पद्यं, नाटकम् इत्यादिविभिन्नप्रकाराः, ध्वन्यलङ्ककार-गुणरीत्यादिविषयैः सहिताः दर्शनगणित-ज्योतिषेतिहासराजनीत्यादिविषयाः रचिताः अभवन् ।

भारतीयभाषासु साहित्ये च न केवलं संस्कृतभाषायाः शब्दजालमेव, अपि तु संस्कृतसाहित्यस्य विचारधाराः, ध्वन्यलङ्कारादयश्च अन्तर्भवन्ति। संस्कृतसाहित्यस्य उत्कृष्टरचनाः विश्वविख्याताः सन्ति। महाकविकालिदासस्य अभिज्ञानशाकुन्तलं रघुवंशम् कुमारसम्भवम् मेघदूतं, भवभूतेः उत्तररामचरितं, भारवेः किरातार्जुनीयम्, माघस्य शिशुपालवधं, श्रीहर्षस्य नैषधं, बाणस्य कादम्बरी इत्यादिग्रन्थाः संस्कृतसाहित्यस्य अमूल्यरत्नानि भवन्ति । अनेके संस्कृतग्रन्थाः भारतीयभाषासु, पाश्चात्यभाषासु च अनूदिताः सन्ति। एवं संस्कृतसाहित्यं विश्वसाहित्ये मूर्धन्यं स्थानं भजते, तथा च संस्कृतसाहित्यम् आधुनिकसाहित्यस्य प्रेरणास्रोतः भवति। अवार्चीनकवयः यथा – हरिदाससिद्धान्तवागीशः पञ्चाननतर्करत्नः श्रीजीवन्यायतीर्थः सीतानाथआचार्यः नारायणदाशः राधावल्लभ-त्रिपाठी अभिराजराजेन्द्रमिश्रः नित्यानन्दमुखोपाध्यायस्मृतितीर्थः प्रमुखाः सन्ति। आधुनिकसंस्कृतसाहित्याकाशे एकः उज्ज्वलनक्षत्रः आसीत् आचार्यनित्यानन्दस्मृतितीर्थः ।

भारतवर्षस्य अपरेषां प्रादेशिकराज्येषु वङ्गदेशस्य संस्कृतसाधकाः निरवच्छिन्नभावेन संस्कृतस्य साधनायां नितराः भवन्ति। संस्कृतस्य विविधशाखासु तेषां योगदानं परिलक्ष्यते। विशेषेण सृष्टिशीलसाहित्ये तथा काव्ये नाटकालंकारशास्त्रेषु वङ्गीयाः संस्कृतसाधकाः तेषां पाण्डित्यं प्रदर्शयति। विविधान् भारतीयाङ्गराज्यानां साहित्यिकाः इव वङ्गदेशस्य साहित्यसाधकाः अपि साहित्यसृजनकर्मणि सर्वदा नितरा आसन् ।

उनविंशविंशशतकयोः समकालिनसमये वङ्गदेशस्य वहवः साहित्यसाधकाः संस्कृतसाहित्यस्य समृद्धिविधानं कृतवन्तः। तैः हरिदाशसिद्धान्तवागीशः वीरेन्द्रकुमारभट्टाचार्यः पञ्चाननतर्करत्नः श्रीजीवन्यायतीर्थः सीतानाथाचार्यः विश्वेश्वरविद्याभूषणः च प्रमुखाः अन्यतमाः। हरिदाशसिद्धान्तवागीशमहोदयः तस्य नाटकानां मध्ये मातृभूमिस्तवनमनन्यमप्रतिद्वन्द्वि च वर्तते। तात्कालिकम् इतिहासं देशात्मबोधकानि काव्यानि ख्यातिसम्पन्नपुरुषान् च अधीत्य नितरां प्रचोदितोऽयमिति प्रतिभाति। तेषु वङ्गदेशीयसाहित्यिकेषु चैतन्यपरम्परायाम् अन्यतमः आसीत् आचार्यः नित्यानन्दस्मृतितीर्थः।

**कविपरिचयः**

संस्कृतसाहित्याकाशे पण्डितनित्यानन्दस्मृतितीर्थः महातेजश्शालि नक्षत्रस्वरुपः भवति । अधुना बांलादेशस्य यशोरमण्डलस्य सारुलिया इति ग्रामे १९२३ (त्रयोविंशत्यधिकोनविंशतिशतम्) इसवीयसं-वत्सरे एप्रिलमासस्य दशमीदिनाङ्के मातुलालये सः अजायत। तस्य पिता रामगोपालमुख्योपाध्यायः स्मृतिरत्नः माता दीनतारिणी देवी च। तस्य जन्मात् अनन्तरं तस्य पिता रामगोपालमुख्योपाध्यायः कलिकाता नगरस्य समीपे हाउडायां स्थायीभावेन निवसति स्म। वाल्यकाल्यात् एव तस्य संस्कृते अनुरागः वर्तते। १९४३ (त्रयचत्वारिंशतमधिक – उनविंशतिशतम्) संवत्सरे तस्य कर्मजीव-नस्य प्रारम्भः अभवत् ।

ज्योतिषशास्त्रनिष्णातः नारायणचन्द्रभट्टाचार्यवर्यस्य पुत्री जयन्ती-देव्या साकं विवाहसूत्रेण आवद्धवान् आचार्यः नित्यानन्दस्मृतितीर्थः। सः तस्य व्यक्तिगतं पारिवारिकं सारस्वतजीवनं च स्वपत्न्याः योगदानं कृतज्ञतापूवकं स्वीकरोति स्म। सः काव्यं व्याकरणं न्यायवैशेषिकं पुराणं स्मृतिशास्त्रं च दर्शनशास्त्रेषु विदग्धः पण्डितः आसीत् । तैः हाउडायां कोडारवागान चतुष्पाठ्यायां (अधुना नाम रामगोपाल-चतुष्पाठी) विद्यारम्भं कृतः। तस्य पितुः वियोगादनन्तरं तस्मिन् चतुष्पाठ्यायां प्रधानाध्यापकरूपेण नियुक्तवान्। नित्यानन्दस्य तृतीयपुत्रः श्रीश्यामप्रसादमुख्योपाध्यायः अद्यापि उक्तचतुष्पाष्ठ्या-याम् अध्यापनकार्ये रतः। तदनन्तरं १९५६ (षटपञ्चाशमधिकंम् - उनविंशतिशतम्) संवत्सरे नवद्वीपराष्ट्रीयमहाविद्यालये मुग्धवोधव्या-करणस्य अध्यापकरुपेण एवं १९६६ (षटषष्ठिमधिकम्उनविंश-तिशतम्) कोलकातासंस्कृतमहाविद्यालये अधुना ( Govt. Sanskrit College and University ) अध्यक्षरूपेण भारतीभवने योगदानं कृतवान् । सः हाउडा संस्कृतसाहित्यसमाजस्य अन्यतमः प्रतिष्ठाता सभापतिः च एवं निखिलवङ्ग संस्कृतसेवासमितिः-सीतारामदासउङ्कारनाथसंस्कृतशिक्षासंसदः–

वङ्गविवुधजननीसभा (नवद्वीप) प्रमुखसंस्थायाः सह ओतप्रोत-भावेन नियुक्तवान्। जीवद्दशायाम् अधिककालः पश्चिमवङ्गस्य कोडारवागानचतुष्पाठ्यां कोलकातासंस्कृतमहाविद्यालये टोल-विभागे च पाठितवान्। एतदतिरिच्य तेन संस्कृतभाषया षडोत्तरशतं नाटकानि सप्तमहाकाव्यानि चतुर्विंशतिःखण्डकाव्यानि वहूनिसंस्कृत-वङ्गीयगीतानि कानिचन वङ्गीयनाटकानि शोधपत्राणि धर्मीयसंस्कारकार्याणि तस्य हृदयवैशद्यं प्रतिभाप्राबल्यं च प्रमाणयन्ति ।

अतः नित्यानन्दस्य काव्यसुरभिः चतुर्दिक्षुः प्रसारिता। सामाजिकाः शिक्षकाः पण्डिताः छात्राः गवेषकाश्च तस्य ग्रन्थान् पठन्ति पाठयन्ति च। काव्य – महाकाव्य – नाटकादीनां रचनायां तस्य प्रतिभा आसीत् अनुपमा । कस्यचिज्जनस्य एतत् विशालं सारस्वतकर्म एकस्मिन् जन्मनि कथं निष्पाद्यं स्यादिति सुतरां विस्मयास्पदम्। सः सूर्य इव सर्वेषु ज्ञानं वितरति स्म। अध्यापनाकार्येषु तेन शाश्वती कीर्तिः स्थाप्यते। धर्मेषु सदा स्थिरा मतिरासीत् । सदाहास्यमयः पावनमूर्तिस्वरूपः सर्वजनप्रियः विद्वान् संस्कृतमातुः सेवापरायणश्च आसीत् कविः नित्यानन्दः। संस्कृतक्षेत्रे तस्य समग्रं योगदानमभिलक्ष्य भारतसर्वकारः १९९४ संवत्सरे तं राष्ट्रपतिपुरष्कारेण सत्कृतवान्। 2008 तमे वर्षे अगष्टमासस्य चतुर्थदिनाङ्के दिवांगतः ते।

**कृतित्वं -**

आचार्यनित्यानन्दस्मृतितीर्थः अध्यापनजीवने कतिचन कृतयः रचितवन्तः तत्र कानिचन ग्रन्थान् विरच्य अस्मान् अनुगृहीतवन्तः । अधस्तात् क्रमानुसारेण आलोचयामि ।

**रामायणमवलम्व्य विरचितानि दृश्यकाव्यानि –**

१.श्रीरघुजन्मवृत्तान्तम् २. श्रीवाल्मीकित्वलाभम् ३. मनःप्रसादनम् ४.वालीवधम् ५. रामविवाहम् ६. सीताहरणम् ७. भरतगुणवन्दनम् ८. सीतोद्धारम् ९.भार्गवदर्पनाशम् ।

**महाभारतमवलम्व्य विरचितानि दृश्यकाव्यानि –**

१.कर्णजीवनम् २.तपोवलम् ३.परीक्षित् - परीक्षणम् ४.द्रौपदीमानरक्षणम् ।

**पुराणविषयमवलम्व्य विरचितानि दृश्यकाव्यानि -**

१.महिषासुरलाञ्छनम् २.ध्रुवप्रसादनम् ३.अकालवोधनम् ४.मातृपूजनम् ।

**देशात्मवोधकदृश्यकाव्यानि**

१.सुशीलविजयम् २.आत्मनिवेदनम् ३.वालेश्वरमहायुद्धम् ४.देशशत्रुनिपातनम् ५.सुभाषविजयम् ६.देशवन्धुकीर्त्तनम् ७.अमरवीरवृत्तान्तम् ।

**वङ्गसाहित्यिकानां रचनामवलम्व्य विरचितानि दृश्यकाव्यानि -**

१.मुकुटम् २.सम्पत्ति-समर्पणम् ३.गुप्तधनम् ४.व्यवधानम् ५.रहमत्खानवृत्तान्तम् ६.रोगिवान्धवम् ७.पुत्रप्रत्यावर्तनम् ८.आनन्दमठम् ९.सुमतिलाभम् १०.चिकित्सासङ्कटम् ।

**महापुरुषाणां जीवनचरितमवलम्व्य विरचितानि दृश्यकाव्यानि -**

१.धर्मसंस्थापनम् २.तैलङ्गवन्दनम् ३.वीरवामचरणम् ४.भक्तरामप्रसादम् ५.कालिदासः ६.वङ्गकीर्तिविधानम् ७.तपोवैभवम् ८.रघुनन्दवन्दनम् ।

**विरचितानि महाकाव्यानि –**

१.शङ्करमहानुभावम् २.श्रीसीतारामदासोङ्कारनाथनम् ३.वामाचरणवैभवम् ४.तैलङ्गवैभवम् ५.सर्वानन्दवैभवम् ६.तर्कनाथवैभवम् ७.श्रीजानकीनाथवन्दनम् ।

**महाकविकालिदासस्य रचनायाः नाट्यरुपम् –**

१.कुमारसम्भवनाटकम् २.मेघदूतम् ।

श्रीनित्यानन्दस्मृतितीर्थविरचितेषु श्रीवाल्मीकित्वलाभम् नाटके पञ्चसु अङ्केषु एकादशदृश्येषु वाल्मीकेः पूर्वचरितं वर्णितमस्ति। रत्नाकरस्य परुषभावं विनाश्य नाट्यकारस्तस्य लोकहितकरत्वं दीनवात्सल्यञ्च निरूपयति। साधारणजनानां दुःखदुर्दशा प्रस्फुरति कविलेखन्याः ।अनन्तरं श्रीरामगोपलपुत्रेण श्रीनित्यानन्देन शम्मर्णा नवीनं रचितं नाट्यं “रामविवाहम्” नाटकम्। रामविवाहम् इति नाटकस्य आदौ नित्यानन्दः वाल्मीकिं प्रणम्यति ।

आदिकविवाल्मीकिः रामायणस्य अयोध्याकाण्डे यथा रामविवाहस्य वर्णनं कृतवान् तथैव नित्यानन्दस्मृतितीर्थः तस्य “रामविवाहम्” इति नाटके रामायणस्य रामविवाहविषयमाधारिकृत्य वर्णयति स्म।श्रीरघुजन्मवृत्तान्तम् नाटके श्रीरामस्य जन्मवृतान्तस्य वर्णनं द्रष्टुं शक्यते । भरतगुणवन्दनम् इति नाटके नाट्यकारः भरतस्य गुणकीर्तनं वर्णयति स्म। पितुः रामगोपालस्यस्मृतिरत्नस्य जीवनसाधनामाश्रित्य रचितं तपोवैभवम्, श्रीश्रीसीतारामदासोङ्कारनाथस्य जीवनसाधनामवलम्व्य विनिर्मितम् श्रीश्रीसीतारामाविर्भावम् सिद्धसीतारामञ्चेति रुपकद्वयम्। सुभाषचन्द्रबसुमहाभागस्य स्वाधीनतासंग्राममधिकृत्य रचितं रुपकम् सुभाषविजयमिति। क्षुदिरामोबसोः स्वाधीनतालाभाश्रयि जीवनचरितं नाट्यायितं भवति अमरबीरवृत्तान्तमिति रूपके । विधानचन्द्ररायस्य जीवनाधारकम् वङ्गकीर्तिविधानमिति नाटकम् प्रभृतयः विरचितवन्तः ।

संस्कृतसाहित्ये कालिदासाश्वघोषादीनां महाकवीनां परिचयं तेषां स्वकृतिभिः सर्वे एव जानन्ति। अधुना ये संस्कृतानुरागिनः संस्कृतज्ञपण्डिताश्च संस्कृतसाहित्यं समृद्धं कुर्वन्ति ते भवन्ति आचार्यः नित्यानन्दस्मृतितीर्थ। तेषां प्रतिभायाः सृजनशीलतायाञ्च आधुनिकसंस्कृतसाहित्यं उत्तरोत्तरं समृद्धःभवति।

**सहायकग्रन्थासूची**


१.नाटकसंग्रहः, मुख्यपाध्योयः नित्यानन्दः, हाओडासंस्कृतसाहित्यसमाजः, वैशाखः १४१४ एप्रिलमासः २००७ ।

२. दृश्यकाव्यसंकलन् (प्रथमभागम् ) मुख्योपाध्यायः, नित्यानन्दः, हाओडासंस्कृतसाहित्यसमाजः, फाल्गुनः, १४१५

३.नाट्यसंग्रहः२ – मुख्योपाध्यायः, नित्यानन्दः, हाओडासंस्कृतसाहित्यसमाजः, १४२७ वङ्गाव्दीय सौरश्रावणस्य १९ दिवसे, २०२० ख्रीष्ट्राव्दस्य आगष्ट मासस्य ४ दिनाङ्के ।

४.चट्टोपाध्यायः ऋता,आधुनिकसंस्कृतसाहित्य (१९९० – २०१०) , छोटोगल्प ओ नाटक , प्रोग्रेसिभ पावलिसार्स, कोलकाता ,२०१२

५.मुख्योपाध्यायः, देवव्रत, वसु, रत्ना। शतवर्षे नित्यानन्दे प्रसूनाञ्जलि, कोलकाताः, हाउडा संस्कृत पुस्तक भान्डार, २०२२ ।

६.चट्टोपाध्यायः,ऋता। शतवर्षे कवि नित्यानन्द (१९२३-२००८ ), कोलकाताः, संस्कृत पुस्तक भान्डार, २०२१ ।।

७.Chattopadhyay, Rita & Basu, Soma. Nityananda Smrititirtha (१९२३ – २००८ ) Kolkata : convergence , 2022

८.शर्मा, च.ल.ना.,सिंहः फतेह। संस्कृतशिक्षणम् – नवीनप्रविधययश्च, १९९६, आदित्यप्रकाशनम्, जयपुरम् ।

९.मुखोपाध्यायः, नित्यानन्दः। वामाचरणवैभवम्, हाओडासंस्कृतसाहित्यसमाजः, १४१६ वङ्गाव्दस्य सौरश्रावणस्य ऊनविंश-दिवसे ।